This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

महापातकव्यतिरिक्तविषये

॥गणेशाय नमः॥ पर्षदध्ये गोब्रह्मयोः प्रत्याम्नायत्वेन यथाशक्ति निष्क्रयं निधाय अमुकस्य मे जन्मप्रभृति अद्ययावत्
ज्ञानाज्ञानकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातकोपपातक
लघुपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपातकानां संभावितानां पापानां निरासार्थं अनुग्रहं कृत्वा प्राय
श्चित्तमुपदिशंतु भवंत इत्यादि॥ अस्मिन्पक्षे अयं शक्त इति निश्चित्य कथयेयुः पुरस्तुवादकस्याग्रे प्रत्याम्नायांश्च कथयेयुः॥ पुस्तकहस्तस्यानुवादक
स्यांच विधाय निबंधपुस्तकालेन वचविंचिद्व्यं यथाशक्ति निधाय कृतांजलिपुटेनास्ति हेतु ततोनुवादकः पर्षत्कृपातकौ नांध्ययोनेन पर्षदुपदिष्टे
न सर्वप्रायश्चित्तेनामुकप्रत्याम्नायद्वारा [illegible] प्रा-ध्योधि-ध्यांगसहितेनाचीर्णेन तव शुद्धिर्भविष्यति तेन त्वं कृतार्थो भविष्यसीति त्रिरुपदिशेत्
अनेन शक्तोसत्यां स्वशक्त्या दानानि सभ्येभ्य एव तदसंभवे अन्येभ्योपि॥ ततः यन्मया कृतममुकप्रायश्चित्तं तदच्छिद्रमस्त्विति कृतांजलिरच्छिद्रमस्त्विति
ब्राह्मणाः प्रतिब्रूयुः॥ यद्वाक्तच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि॥ सर्वं भवतु मेऽच्छिद्रं यस्य [illegible] छंति वै द्विजाः इति प्रतिवचनं॥

ACC. No: ~~2220~~ M999

Title: - आधानप्रकरण

subject: - Ritual

Author: - आश्वलायन

पत्रे: - 95

K K S U LIBRARY
RAMTEK
441 106
M999
Dist Nagpur

①

Checked 2012

॥श्रीगणेशायनमः॥ फलमतउपपत्तेरितिनयतोऽशेषकर्मफलदाता नमहं सकलसुराणां परमं प्रण
१ मामियज्ञनामानं १ अथाधानं तत्रकल्पसारः। आधित्सुरग्नीन्सुरतोविशुद्धः शिष्टाननुज्ञाप्यत
थोनमर्णान् कृच्छ्रादिशुद्धः कुशलीसजायोमैत्रींत्रिजेत्प्राणिभिराकुमारं। शुद्धोपिकूष्मांडगणाहु
तीः क्रमात्कुर्यादिति। आपस्तंबः। द्विभार्योनैकयासार्द्धमादधीतहुताशनान्। ससंसृष्टसवर्णाग्नि
मसवर्णां विहायच। कात्यायनः। सवर्णायांव्यतीतायामसवर्णायदाभवेत्। ओढ्वासवर्णा ढ्वा
माधानं। विदध्यात्तान्यथाक्वचित्। हरदत्तीये जैमिनिः। अनाचारांपापरोगांहीनांगीकुलदूषि
कां। सवर्णामसवर्णांवा। विहायाधानमाचरेत्। जातपुत्रोऽजातपुत्रोवाकूष्मांडगणहोमा
भ्यांगवादिदानैश्चात्मानंपावयित्वासपत्नीकआदधीतबहुपत्नीकश्चेत्सर्वाभिः सहैवादधीते
तितत्रकृतः तथाचकर्मान्ते एकैकांसंनह्यत्येकैकांगार्हपत्यमीक्षयत्येकैकामाज्यमवेक्षयतीति। निव १
चनात्सर्वाभिः सहैवाधिकारः प्रतीयते। रुद्रैकादशिनीत्रिंशच्चोपवासावपिशुध्यर्थंपूर्वंकार्या

वित्तिदेवः। कृत्तिकारोहिणीमृगशीर्षपूर्वोत्तराविशाखोत्तराभाद्रपदानक्षत्राणामन्यतमे पर्वणि वसंते ब्रा
ह्मण आदधीतेत्याश्वलायनः। पुनर्वसुचित्रे अप्याह बौधायनः। श्रवणमघानुराधा अप्याह आ
पस्तंबः। वसंतश्चांद्रमासद्वयात्मक इति वृत्तिकृत्। वसंतस्यासौरचांद्रात्मना द्वैविध्यात्सौरस्यापि मी
४।ति नमेषयोर्मेषवृषयोश्चेति द्वैविध्यात्सवितुः फाल्गुने मीनराश्यनुप्रवेशे कार्यमाधानमिति तंत्रकृत्। यद्युक्त
नक्षत्रपर्वयोगो वसंते न लभ्यते ततः पर्व परित्यज्य केवलं नक्षत्रं ग्राह्यमिति सिद्धांतभाष्यवृत्तिकृतौ।
नृसिंहः। उक्तनक्षत्रसंबद्धं यदि पर्व न लभ्यते। तदोक्तभेषु कस्मिंश्चिदेकस्मिन्नादधीतभ इति। देव
त्रातस्तु प्रथमप[illegible]वसूत्रोक्तं मन्यते। तंत्रकृतानुयोरोहिण्यामित्यादि बौधायनीय[illegible]सूत्रमनुसृ
त्येत्थमवादि मुख्यचांद्रवैशाखामावास्यारोहिणीयुक्ता मुख्यातमः कालः सा दिनकलत्रामा
दाय चतुष्पथं गत्वा सिंहे मे मन्युरित्यादिमंत्रद्वये पितुल्यं अंने पायसेन ब्राह्मणान्भोजयित्वा
गोहिरण्यादि दद्यात्। इति गणहोमः। अवादीत्थमनंतेन कूष्मांडगणहोमयोः। प्रयोग

स्तेनयोगेत्राः प्रीयतांसर्वयिस्नभुक्।सवितारंचरुणाग्निं ·जगद्वीजंपुरुषंनारायणं १८ पुरुपमेवना
२ रायणमेवः पुरुषंनारायणमेवया· अग्निम ९ होमुचं द्विः। इंद्रम ९ होमुचं द्विः। मित्रावरुणाया
गोमुचौ द्विः। वायुसवितारावागोमुचौद्विरश्विनावागोमुचौद्विर्मरुतएनोमुचोद्विरनुमतिंहिव्यवाहं
अग्निमनुमतिमनुमतिंद्विरिसेववावैश्वानराग्निंद्विःघावापृथिवीअ ९ होमुचौद्विरग्निंद्विरिंद्राव
रुणाव ९ होमुचो ४ अ ९ होमुगादिविशेषणरहिताउक्ताः सर्वदेवतावा·इंद्रावरुणौ ८ तयोरग्न्या
दिषुश्वामंवा ८ पावमानीः सप्तदशावारंयज्ञापवमानंसुवर्जनंविचर्षणिंपोतारंदेवयजनमनुवि
श्वायून्। जातवेदसमग्निंदेवसवितारंः सवितारमेववचाः वैश्वदेवीपुनतींदेवी· वैश्वादेवीमेववा वै
श्वानरं· वीतंऋषिरंमयोभुवंघावापृथिवी·ऋतावरीच· सवितारमग्निंच। ब्रह्म·पवमानंपद्धारंब्रह्म २
ऋद्वंसुनीतासहितंसोमंस्वस्त्यासहितंवरुणंसमीच्यासहितंयमंराजानंप्रमृणाभिःसहितांजात
वेदसमूर्जयंत्यासहितं· सुनीत्यासहितमिंद्रमिसेववादेवानादित्यान्· अग्निंगार्हपत्यंघावा

पृथिवी सरस्वती जातवेदसमग्निं गार्हपत्यं दूरेपश्याराष्ट्रभृतावसरसः। अग्निं गार्हपत्यं २ अग्निं॰ अग्निं गार्हपत्यं॰ अपः शुंधनीः। अपो हिरण्यवर्णाः। अप एव वा। वरुणं॰ अग्नीवरुणौ। अग्निमय। सं॰ अग्निं वैश्वानरमष्टवारं चरुणा॰ शेषेण स्विष्टकृतमित्यादि। तदभावे रोहिणीयुक्पर्वांतरमपि॰ रोहिणीयुक्तयजनीयतिथ्यो वा। तदभावे केवला रोहिणी॰ तदभावे नक्षत्रांतराणि। तत्राप्यनु नक्षत्रपर्वयोगः प्रधानं तदभावे पूर्वपक्ष एव तत्रानु नक्षत्रयोगो ग्राह्यः अत्र तु पर्वणि योगो वा। देवस्तु उदगयने पूर्वपक्षे रोहिण्यां तूत्रेव नक्षत्रांतरे वा पौर्णमास्यामावास्ययोर्वा दधीतेत्याह। दक्षिणायनेऽपि विहितमित्याह केशवः। हरदत्तस्तु रोहिण्यामुत्तरयोः फल्गुन्योः आधानमतिप्रशस्तमित्युक्त्वाग्नित्रयाधानकाले वैशाखमासप्रतिपदुत्पन्नरोहिणीयोगसंभवे महद्वैशिष्ट्यं। अग्नित्रयाधाने योगासंभवे आहवनीयाधानयोगः आवश्यक इत्युक्त्वात्रेणनकवचउदाजहार। वसंतेकुर्ड्डांरोहिण्यासंयोगे यजनीयेवाक्विव द्विमादधी

नोतमंवा।नोतममतिवर्जयेदिति।उक्तर्त्तुं विनापिनक्षत्रे आनंकार्यं।नक्षत्रं विनाप्यृतौपर्वणिका धा
२ र्यमित्यप्याह।नक्षत्रेकेवले वापिऋतौकेवले भवेत्।आधानंपर्वसंपन्नावपर्वणिचवापुनरित्याप वा
स्तंबोक्तेः।आर्त्ताधानेतु नर्त्तुनियमः।पर्वनक्षत्रनियमस्त्वस्त्येवेतिवृत्तिकृद्वचनात्।सोपिनेनि
नंत्रकृत्।हरदत्तीये।यदार्त्तः श्रद्धालुश्चभवतितदादक्षिणायनेउक्तनक्षत्रेपर्वणिदक्षिणायनंषोढा
विभज्यवसंतादिनतदंशेनैस्तैः कर्त्तव्यं।शिशिरःसार्ववर्णिकइत्येकः पपक्षः।दक्षिणायनउक्त
नक्षत्रइत्येकः।दक्षिणायनेपर्वणीत्येकइतिशिशिरस्यचसार्ववर्णिकत्वमाहवसिष्ठः।आदधी
नानलं विप्रोवसंतग्रीष्मयोरपि।ग्रीष्मेवर्षास्वपिक्ष्मापः शिशिरःसार्ववर्णिकइति।यद्यप्यत्रा
विशेषेणग्रीष्मउक्तस्तथाप्याषाढंविहायतत्रविप्रेणाधानंकार्यंआदधीनानलान्विप्रोनाषा
ठेमासिकर्हिचित्।भाद्रेमासिनन्नराजन्योनाश्विनेप्यूरुजः क्वचिदितिफासायनोक्तेः।आप ३
स्तंबेतुमाघादिपंचमासेषुत्रिवर्णाधानमिष्यते।केवलेफाल्गुनेवास्यादारंभोवोत्तरायण

6

का
इति। रेणुकारिकायां तु। माघादिपंचमासेषु श्रावणे चाश्विने तथा। मार्गशीर्षे शुक्लपक्षे आधानम
थ कारयेदिति। स्मार्ते विवाहं प्रकृत्य बोधायनसूत्रं। यथाश्रद्धमतऊर्ध्वं जीवति पितर्यग्नीनादधीते
ति बोधायनो जीवति मृते वा जायामवाप्य दशमेहनीति शालीकिर्नदुर्ब्राह्मणो भवतीति। यत्तु कर्मा
ने। कामयुक्तान्यग्न्याधेयानि भवंति। कृतिकास्वग्निमादधीत रोहिण्यां पुनर्वस्वोरित्युपक्रम्य
सद्यस्कालान्येतानि भवंतीति नित्यकाम्याधानविषयं। अत एव भवस्वाम्याह। रोहिण्यामाग्नि
मादधीतनक्षत्र ध्नोसेवेति नित्यत्वख्यापनार्थं। इतरेषामपि तु कामयुक्तानीति वचनादनित्यते
ति। आनंधानेपि सद्यस्कालत्वं कर्मान्त एवोक्तं। अथातः आनंरस्यात्वग्न्याधेयानि व्याख्या
स्यामो विपक्षआ पूर्यमाणपक्षेआदधानो यावानवकाशः स्यात्तदहर्विदधीत पौर्णमा
स्यां सद्यस्कालमित्यादिना। उक्तकाले आधित्सुर्मलमासगुरुशुक्रबाल्यवार्धकास्तकाला
न्परिहरेत्। अग्न्याधेयादिकर्माणि प्रकृत्यः बाले वाथ दिवा वृद्धे शु गुरुशुक्रे चास्तमुपा

गते। मलमासइवैन्नानि वर्जयेदित्यादिनिषेधात्।ः तत्र गुरुशुक्रयोर्बाल्यवार्धककालपरिमा
४ णमुहूर्त्ततत्वे। प्राक् पश्चाच्छुक्रबाल्ये त्रिदिनदशदिनं पक्षमासत्र्यं त्रावार्द्धते द्वे पक्षं गुरोर्द्विश
दशादिनं शुभयोर्वा त्र्यहं केपि नेष्टमिति। ज्योतिर्निबंधे मांडव्यः। त्यजेद्दशाहं शिशुवृद्धयोश्च सि
ते ज्ययोश्चेति वदंति गार्ग्याः। कालांशतुल्यानि दिनानि चैके सप्ताहमन्ये त्वपरे त्रिरात्रं इति।
संहिताप्रदीपे। स्यात् सप्तरात्रं गुरुशुक्रयोश्च बालत्वमक्षं दशाकेन वार्द्धं। वृद्धो सिते ज्या वसुभौ
त्रिशुल्तेशास्तौ यतस्तावुपचीयमानाविति इत्याधानकालः अथ विहारदृष्टदेशोप्रसकृद्दक्षि
णोन्नते प्रागुदक्प्रवणे दीर्घचतुरस्रे समचतुरस्रे वा अगारं प्राच्यां दक्षिणस्यां द्वारद्वयमुक्तं कृ
त्वा तत्र विहारं कुर्यात्। यथा वेदक्षिणः पाणिरिति सूत्रेण तथैव केशवोक्तेः। मध्ये मारं चतु
र्विंशत्यंगुलं लविष्कंभं गार्हपत्यायतनं कर्तुं तदर्धेन वृत्तमवनमयेदिति देवः। सभाधि ८
कां विंशतिमंगुलीनां विष्कंभमाकुर्निलयं पराग्नेः मध्यस्थशंकुस्थितयोर्ज्ज्या विलिख्य
र्ध

नांमंडलमप्रसव्यमितिनुकल्पसारः। तंत्र कृदप्यैकं गार्हपत्समध्यदेशादारभ्यद्वादशप्रक्रमेद्वादश
पदे वा प्रक्रमाष्टके पदाष्टके वाहवनीयमध्यदेशाइतिसः। देवस्व। गार्हपत्समध्यशंकोराहव
नीयपश्चिमशंकोश्चैनदंतरंगार्हपत्याहवनीयमध्ययोर्वोभयांतयोर्वाचिह्नषावाएतावद्वा
दशाविक्रामपरिमितंभविष्यतीतितिनि। श्चित्सवेदिमानंकुर्यादितिहरदत्तः। एषामन्यतमायां
रज्जुं पंचधा षोढा वा संभुज्य षष्ठं सप्तमं वा भागद्वयमागंतुकं संयोज्यउभयतः पाशौ कृत्वा पु
नः पंचधा संभुज्य अपरांताद्भागद्वयेतीनेलक्ष्म कृत्वा शंकोः पाशौ प्रतिमुच्य लक्ष्म
णा दक्षिणाकृष्य शंकुं निहन्यात्। एवमुत्तरत आर्जवाय। दक्षिणशंकोरुदक्द्वादशाति
लाधिकांगुलिद्व·ये शंकुं निहन्यात्। तिलद्वयाधिकपदमात्रां रज्जुमुभयतः पाशां कृत्वात
स्मिन्पाशं प्रतिमुच्य मंडले लिखेत्। मंडलोत्तररेखायां शंकोरंजसा शंकुं निहत्य। तत्र पाशं
प्रतिमुच्य पूर्ववन्मंडलांतरं कृत्वा मंडलसंधी नियम्योत्तरं पार्श्वमुत्सृज्य दक्षिणपार्श्वे दक्षि

णाग्न्यायतनं कुर्यात्। स्थानादुदक्शंकुमशीतिभिस्तिलैर्मितै निबध्य प्रतिबध्य दाम च। द्वंतिला
५ भ्यां चयद्वायजंतो विलिख्यतां तेन बलेन मंडलं। तयोत्तरस्मात्सरिधेस्तक्मं ध्यादारभ्य संवर्त्सच्च
वर्त्तुलं तनू। संधौ विभज्यद्वयमुत्तरांशांस जेत्परो दक्षिणावह्निदेशः। पूर्वान्स्वरासश्चिमतोथवे
दिपंचप्रमाणमथ षट्पदं चेतिकत्न्यसाररः। द्वादशतिलाधिकचतुर्विंशात्संगुलिविष्कंभो द
क्षिणाग्निस्तस्य च तु भागे मध्यशंकोरुत्तरातीते शंकुं निहत्य तत्र विष्कंभार्द्धेन मंडलं कृत्वा त
त्रप्राचीस्पंद्यां निपत्योत्तरमर्धे परिसज्य दक्षिणाग्न्यायतनं कुर्यादिति देवः। आहवनीयमध्यशं
कोः पश्चात् [illegible] रत्नौ च्च प्रादेशे शंकुं निहत्यारत्निद्वयायामामुभयतः पाशां रज्जुं कृ
त्वा पाशादारभ्य द्वादशांगुले ष्टादशांगुले च लक्षणं कृत्वाहवनीयपूर्वापरयोः शंक्वोः
पाशौ निधाय द्वितीयलक्षणं दक्षिणात्त उत्तरतश्चाकृष्य प्रथमे लक्षणे शंकू निहत्य पाशौ ५
व्यत्यस्य पूर्ववच्छंकू निहन्यात्। नवतिलाधिकैकविंशात्संगुलप्रमाणमाहदेवः। अतश्च

तुरस्रमाहवनीयायतनं आहवनीयापरशंकोः षट्सप्तत्यंगुले शंकुः। षट्सप्तत्यंगुलामध्यर्धहि
त्वाममाणां ते माच्यर्थे चिह्नं छित्वा चत्वारिंशदंगुलेन्त्यं छेनार्थे चिह्नं करोति। द्वात्रिंशदंगुले
श्रोण्यर्थे। चतुर्विंशत्यंगुले ष्वंसार्थे। न्यंछनेन दक्षिणतश्श्रोत्तररज्जुमुपायम्य श्रोण्यंसौ कुर्यात्।
दक्षिणद्विगुणां पार्श्वमानीं मध्यचिह्नवन्तीं कृत्वा दक्षिणश्रोण्यंसयोः पाशौ प्रतिमुच्य लक्षणं दक्षि
णतश्श्वा कृष्य शंकुं निहन्यात्तत्र पाशौ प्रतिमुच्य लक्षणेन श्रोणीप्रभृति अंसाः परिलिखेत्।
एवमुत्तरपूर्वापरपार्श्वानि विपरिलिखेत्। यदि भूमिरणुस्तका स्याद्रज्जुर्द्विदशधा कृता। व
र्धयेत्तां त्रयोदशस्यात यथा चांसे बहिः क्रियेति गोपालः। कुंडे स्रुच प्रथमा मेखला षडंगुलोत्से
धा षडंगुलायामा कार्या द्वितीया षडंगुलोत्सेधा चतुरंगुलायामा कार्येति। वेद्यामाद्यमे
खला चतुरंगुलोत्सेधा कार्या द्वितीया द्व्यंगुलायामोत्सेधेति इति विहारः अथ पात्राणि द्वे
धे सह स्माह बौधायनस्त्वक्क आसेचनानि कारयेदग्रतः पुष्कराण्येवं अस्य प्राचीनपुष्कराः

स्रुचः सन्नाभवंतिस्रुक्चांप्रमाणंइतिवाङ्मात्राइतिबोधायनः अरत्निमात्राइतित्रगालीकिः।। प्रादे
६ शमात्राविस्रोः स्रुक्चामाकृतिविकारइतिहस्तौष्ठ्यः स्रुगितिबोधायनः। वायसपुच्छाविति शान्
ति। शेषंयज्ञतंत्रेद्रष्टव्यं। अथारण्याहरणं। आधानात्पूर्वंशरदिहेमंतेवापूर्वदिनेकृतमंगलःपु
ण्याहंवाचयित्वाग्रामाद्बहिः प्राचीमुदीचींवागत्वाशमीगर्भमश्वमीगर्भंवाचतुरंगुलमुत्सेधांद्वा
दशांगुलविस्तीर्णांषोडशांगुलमायतांअपिवाप्रादेशमात्रांसर्वतः समांचतुरंगुलमुत्सेधांकृ
त्वातस्माउत्तानायाअनुलोममधस्तोत्प्रसक्प्रवणंप्रजननंकुर्वंति। तावतीमेवोत्तरारणिं।
शम्यापरिवृतोश्वत्थः अपरिवृतोवातस्यविकारोवेत्यपितिभवः। हरदत्तीयेजैमिनिः। शमीकोट
रजोश्वत्थः शमीगर्भोनिगद्यते। शम्पासंसक्तमूलोवाशमीछायागतोपिवेति। त्रिकांडमंडनः।
हेमंतेवाशरत्कालेशुक्लपक्षेशुभेदिने। नांदीश्राद्धाद्यंतः शुद्धः कृत्वापुण्याहवाचनं। अध्व ६
र्युसहितोगत्वाशुक्लैःस्त्रभूषणः। पुनः श्वेतांकुराश्वत्थादाहरेदरणीद्वयंमिति। चतुर्विंशत्संगुला
स्त्रग्व१

१०

यामेअष्टांगुलविस्तारेचतुरंगुलोत्सेधेअरणीकार्येइत्सपिदेवः। अधरारणेः पश्चिमांतेप्रवणांग
र्नंकुर्यादितिसः। उत्तरारणेः सकाशाग्रात्सकृन्निम्नेप्रजननंकुर्यात्। अरण्योरुत्तराधरभावो विदारि
त्तवृक्षस्कंधोत्तरभागनिबंधनः। अविद्यरितेमथ्येच्छं। उत्तरारण्यवसानेतु अधरारण्यवस्थाय ज
ननंकुर्यात् इतितंत्रकृत्। अरण्याहरणकालएवयज्ञपात्राण्यपिसंभरेदितिहरदत्तोदेवश्च। क
ल्पसारोपि। अरण्याहरणंसाकंसर्वयज्ञियकेतुभिरिति। अध्वर्युणायोश्वत्थः तंत्वेहरामीतिमंत्रे
णअरण्याहारणेक्रियमाणेयजमानः। योश्वत्थः तंत्वेतिमंत्रेणअरणीआहरेत्। तथैवेतिकृ
त्कः। पुत्रकापरपर्यायंप्रजननमष्टांगुलं। खादिरोद्वादशांगुलोमंथानाविनिर्दिष्टाः। इदंचबहिः
प्रयोगमरण्याहरणांकृत्वाकरिष्यन्वासंभारोपकल्पनंकुर्यात्। यथाहरदत्तः संभारानुद्दिश्य
तेषांसंभरणमनुक्त्वारणिपात्रसंभरणकथनंतानिसंभृत्यसंभाराहरणंपश्चादपिकर्तुंशक्य
मितिघोतनोर्थमिति। अथसंभाराः। बोधायनः। सउपकल्पयते। उषान्सिकताश्चाखूत्करंच

13

वल्मीकवपां च सूदं च पराहविहतं च पुष्करपर्णं च शर्कराश्चेत्यष्टौ पार्थिवाः। अथ वानस्पत्याः अश्वत्थ
श्चोदुंबरश्च शमी च विकंकतश्चाशनिहतश्च शमीगर्भा वरणी मुंजकुलायं चित्रियस्वोस्याश्वत्थस्य
त्रिस्त्रः समिधः आर्द्राः सपलाशाः सप्तारोहाः प्रादेशमात्रीरत्निशुष्काः षट्‌हिरण्यशकलान्त्रीन्सौ ७
वर्णान्त्रीन्राजतानश्वं पूर्ववाहं रथचक्रं ब्रह्मौदनिकान्व्रीहीन्सर्वौषधं रोहितं चर्मानडुहं नवानि य
ज्ञपात्राणीति। यद्यपि संभरणमंत्रक्रमात् सिकताश्चोषांश्चेति वाच्यं। तथापि पूर्वमप्सु षाणां संभ
रणमस्तीति सूचनार्थं सुषग्रहणं। यथाह हरदत्तीये आपस्तंबः नाग्निमग्ने संभरेद्दाङ्कुकाः प्रजासुः
पुष्टिमेवाग्नेस्सभरतीत्येकमिति। अग्निं सिकताः। वैश्वानरस्य रूपमिति मंत्रात्। पुष्टि रूषाः। पुष्टि
वीर्णषाप्रजननं यदूषा इति श्रुतेः। आरकूनामुत्करः समूहो यत्र पांसोत्तन्मूखान इत्यर्थः। वपाछिद्रं
तन्मृत्। सुषूदकं यस्मिंस्तन्मृत्। कमलपत्रस्य पार्थिवेषु गणनं अवानसुसत्वासर्णं पृथिव्याः
प्रथनमिति मंत्राच्च। अष्टौ पार्थिवा इति पृथक्करणेन पार्थिववानस्पससस्पर्शांतराले मंत्रक्रमप्राप्ते

नशाकलस्यशेनिध्यवधानंसूच्यते॥ मंत्रक्रमेणाङ्गानि हतं चित्रियसमिधोमुंजकुलायं अरण्याविति
वन्क्तव्येव्यसयोक्तिः समित्संभरणे विकल्पसूचनाय। तथा च भवः। पुरस्तात्समिधामरणीसंभरतीत्ये
कइतिस्वसन्नयासाधकत्वस्यारण्योर्मुंजकुलाये च तुल्यत्वात्संभारान्तराणां स्वनाम्नो नसाधकत्वा
दरण्यन्तेनन्निर्देशाः। संभरणं तु मुंजकुलायस्यैव पूर्वमुचितं। अरण्योर्यथा नारब्धकार्ये विनियोग
हेतुत्वा। विनियोजकसंभरणं नेच विनियोज्यसंभरणस्योचितत्वात्। त्रींस्त्रीनिसेवसिद्धे बहूत्वेसि
द्धेपुनः षड्डुक्तिः सकृन्मंत्रमासमर्थं। चित्रियसमिद्धदितराअपिआर्द्रत्वादिगुणयुक्ताग्राह्याः।
अपिवायथालाभंउभयोरपीत्यवादिसंभरणसूत्रे। कर्मीते। उभाश्वसिकनाश्वेत्तियेभस्मरा
द्वीषास्पुस्तानाहरेद्वारण्यसवराहस्य विहतादारण्यस्याखूत्करादाहारयेद्यो नुपदासूद॰
स्यात्तदाहारयेत्सूदे विद्यमाने कुलीरस्तुषिरादाहारयेद्दशानिहते विद्यमाने शीतहतमोहारयेद्वात
दहतं वेति। कुलीरः कर्कटः। द्वे धे॰ अत्रो॰ बो॰ नात्रानि नाशानि हतं कुर्वरि तघोरस्रूपमितिकु

15

वरं नैवाशनिहतं न तु मुंजकुलायं नह्येतस्यानुख्या विद्यत इति। शालीः रिति। मुंजकुलीयाभावपक्षे
८ मुंजस्तंबं मुंजपुष्पं शीर्णपर्णं वेति केशवः। सर्वौषधमाह कल्पसारः। तिलांश्च माषांश्च यवान् प्रि
यंगून्व्रीहीनणून्सासमित्तान्खलित्थान्। गोधूमान्वा प्रवदंति तत्र ग्राम्याणि मानौषधिशब्दवाच्या
न्। श्यामाकनीवारगवीधुकांश्च राजतिलागामुनंवांस्क वेणून्। स्थाने तु वेणोः कुरुविंदका
न्वा वदंति चारण्यमवांस्क सद्वेति। तथा सूत्रानुक्ताप्येनानुपकल्पयते। वासिष्ठवैश्वामित्रांगि
रसाप्यास्यान्ब्रह्महोत्राध्वर्यूद्गातॄन्नाग्नीध्रं च योनिवृत्तादिगुणसंपन्नान्निमंत्रे गोत्रान्वोद्गात्रावि
नाचतुरण। वस्त्रत्विजो वा। ऋत्विक्समसंख्यान्विष्टरान्पाद्यार्घ्याचमनीयमधुपर्कपात्राणि
दधिमधुनी सप्तमोत्तरीयवासांसि अशनीयं च क्षौमे च समित्कुशांत्रीत्छरावान् उदकुंभाने
कोनपंचाशद्वृक्षान्विभीतकानेरंडोपबर्हणं औदुंबरीं दर्वीं तिस्रस्त्रिस्रोप्यश्वत्थादि समिधो हू
वींषि गंधपुष्पफलानि सूत्रे यवानिति संभाराः। अथ प्रयोगः। तत्र ज्येष्ठस्याहिताग्नित्वमिसें

वमादिना आधाने अधिकारः। सत्यधिकारे अग्न्यनाधाने अनाहिताग्निना प्रायश्चित्तं कुर्यात्। तद्यथा प्राय
श्चित्तं कर्तुं गणपतिपूजनं कृत्वा त्रीनेकं वाध्यात्मविदं पर्षत्त्वेनोपवेश्य कृतस्नानः शक्तो सत्यां। क्लि
न्नवासाः अभुंजानः पर्षदं प्रदक्षिणीकृत्य साष्टांगं प्रणामेत्। ततः किं ते कार्यं मिथ्या मा वादीः सत्य
मेव वद इति। पृष्टो पर्षदग्रे गोवृषयोः प्रत्येकं प्रत्याम्नायत्वेन पापहा महाविष्णुप्रीत्यर्थं गोमिथु
नं निष्क्रयीभूतं पर्षदे संप्रददे इति प्रयाश्च। किं द्रव्यं विधायाभुकस्य मे अनाहिताग्निताजनि
तप्रत्यवायपरिहारार्थं अनुग्रहं कृत्वा उपदिशन्तु भवन्तः। सर्वधर्मविवेक्तारो गोप्तारः सक
ला द्विजाः। मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः। मयाकृतं महाघोरं ज्ञातमज्ञातं किल्बिषं
प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतैः पवित्रोहं भवेयं द्विजसत्तमैः। द्विवच
नान्तऊहः केचिदित्येवं प्रार्थयेत्। ततः प्रणमेत्। मामनुगृह्णन्तु भवन्तः। ततस्तैः शक्तिं वि
चार्य अब्दादर्वाक् प्रतिमासं त्रिरात्रं ततः प्रत्यब्द्याज्ञवल्क्योक्तं मासं पयोव्रतं अशक्तं प्रत्युप

17

देष्टव्यं। मासंपयोव्रतेनसार्धंप्राजापत्यद्वयमित्युक्तंमिताक्षरायां. अनेनशप्रायश्चित्तेनयथाशक्तिप्रत्या
म्नायद्वाराअनुष्ठितेनपूर्वोत्तरांगसंहितेनतथाअनाहिताग्निताजनितप्रत्यवायक्षयोभविष्यति।
तेनत्वंकृतार्थोभविष्यसीतिनिरूपदेष्टव्यं. प्रत्याम्नायश्चगायत्र्ययुतजपे। तिलहोमसहस्रेद्वाद
शब्राह्मणभोजनेतीर्थेयोजनयात्रायांएकदानसुवर्णरूप्यनिष्कतदर्धतदर्धानांगोमूल्या
नांशेत्यादाने शुष्ककेशास्यद्वादशास्नानेषु द्विगुणद्वादशग्रामान्नदानादौचैकः प्राजापत्यइ
ति. निष्कः मासाः ४० तदर्धं २० तदर्धं १० ततो निवेदितंप्रायश्चित्तंभवदनुग्रहइत्संगीकृत्यसम्प्रण
म्यपर्षदंविसर्जयेत्. अस्मिन्नहनिशक्तेनोपवासः कार्यः। इतरेणहविष्याशनंततः कस्यां
चिन्नरिक्तातिथौकृतमाध्याह्निकः सायाह्नेगंगादौदेशकालौसंकीर्त्याऽमुकशर्मणो अना
हिताग्निताजनितप्रत्यवायपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंइदमुपदिष्टंप्रायश्चित्तंयथाश
क्तिप्रत्याम्नायद्वारापूर्वोत्तरांगसहितंयथाशक्तिकरिष्येइतिसंकल्प्ययानिकानिचपापानि

ब्रह्महत्यासमानि च। केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं इति मंत्रेण प्राङ्मुख उदङ्मुखो वा
।शिखाकक्षोपस्थवर्जं नखलोमानि वापयित्वा प्राङ्मुखो द्वादशांगुलदंतकाष्ठेन आयुर्बलं यशो।
वर्चः प्रजाः पशुवसूनि च। ब्रह्मप्रज्ञां च मेधा च त्वं नो धेहि वनस्पत इति दंतान् शोध्य स्नात्वा भस्मादि
।स्नानं कुर्यात्। तत्र भस्मस्नानमेवं। ईशानाय नम इति शिरसि। तत्पुरुषाय इति मुखे· अघोराय
नम इति हृदये॰ वामदेवाय नम इति गुह्ये· सद्योजाताय नम इति पादयोः। ईशानादिमंत्रैर्वा प्रण
वेन सर्वांगः अग्निरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भ
स्म इति मंत्रैः। एवं च भस्मना स्नात्वा गोमयेन स्नायात्। गधद्वारां: अग्रमग्रं चरंतीनामोषधी
नां वने वने· तासामृषपत्नीनां पवित्रं कायशोधनं· तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदेति
मंत्रेण गोमयस्नानं। अथ मृत्तिकास्नानं वलित्था पर्वतानां खिदं विभर्षि पृथिवि। प्रया भूमिं
प्रवत्वति मह्ना जिनोषि महिनीति भूमिं प्रार्थ्य मा वो रिषत्खनिता यस्मै चाहं खनामि वः।

19

द्विषन्त्वमुष्यदस्माकं सर्वमस्त्वनातुरमिति खनित्वास्योनापृथिविभव। नृक्षरानिवेशनी। यच्छानः शर्मस
१० प्रथइतिमृदमादाय आयनेतेपरायणेदूर्वारोहंतुपुष्पिणीः। ह्रदाश्चपुंडरीकाणिसमुद्रस्यगृहा इ
मइतिदूर्वामादायगायत्र्या सदूर्वांमृदमभ्युक्ष्य भूमौनिधायाचम्यदेशकालौस्मृत्वा मृत्स्नानमहं
करिष्यइतिसंकल्प्य मृदंकुशोदकेन अभ्युक्षेत्। ततोदिक्षु मृदंक्षिपेत्। त्रातारमिंद्रेति पूर्वस्यां।
यमायमधुमत्तमंराज्ञेहव्यंजुहोतनइदंनमऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यइति दक्षिणस्यां।
तत्वायामीतिपश्चिमतः। वयंसोमेत्युत्तरतः। ततोंगेषु सहस्रशीर्षेतिशिरसि। अक्षीभ्यांतेनासि
काभ्यांकर्णाभ्यांकर्णाभ्यांछुबुकादधि। यक्ष्मंशीर्षण्यंमस्तिष्का। ज्जिह्वायाविवृहामितेइति मुखे।
ग्रीवाभ्यस्तउष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मंदोषण्य१मंसाभ्यांबाहुभ्यांबाहुभ्यां
विवृहामितइतिग्रीवायां। आंत्रेभ्यस्तेगुदाभ्योव. निष्ठाहृदयादधि। यक्ष्मंमतस्नाभ्यांयक्नः प्ला १
शिभ्योविवृहामितइतिहृदये। नाभाभानाभिंन आददे चक्षुश्चित्सूर्येसचा। कवेरपत्समादुहेइ

तिनाभौ॰ त्वमिंद्रसजोषसमर्कंबिभर्षिबाह्वोः। वज्रंशिशानओजसेतिबाह्वोः। सोमानंस्वरणंकृ
णुहिब्रह्मणस्पते॰ कक्षीवंतंयऔशिजः इतिकक्ष्योः। यकुक्षिःसोमपातमःसमुद्रइवपिन्वते।
उर्वीरापानंकाकुदः इतिकुक्ष्योः। बह्वीनांपिताबहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य। इषुधिः
संकाः पृतनाश्चसर्वाः पृष्ठेनिनद्धोजयतिप्रसूतइतिपृष्ठे। ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदा
भ्यां। यक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामितइत्यूर्वोः। मेहनाद्वरंकरणाल्लोमभ्यस्तेनखेभ्यः। य
क्ष्मंसर्वस्मादात्मनःस्तमिदंविवृहामितइतिजान्वोः। एतावानस्येतिपादयोः। अंगादंगाल्लोम्नो
म्नोजातंपर्वणिपर्वणि। यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते। पुरुषसूक्तेनचसर्वांगं॰ अ
श्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरा। शिरसाधारयिष्यामिरक्षस्वमांपदेपदे। सतिलंदूर्वांमृ
दं निधायतीर्थंप्रार्थयेत्। हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमोदेहियाचितः। यन्मयाभुक्तमसाधूनांपापे
भ्यश्चप्रतिग्रहः। यन्मेमनसावाचाकर्मणावादुष्कृतंकृतं॰ तन्नइंद्रोबृहस्पतिःसविताचपुनंतुपुनः

पुनः। आपो अस्मान· गंगागंगेति· ततस्त्रिर्मज्जनं कृत्वा समुद्रज्येष्ठा चतसृभिः। एतोन्विंद्रमिति तिसृभिः। तरत्समंदीति सूक्तेन· पावमानीभिः। आपोहिष्ठेति तृचेन च मार्जनं कृत्वा इमं मे गंगे इत्युदकमालोड्य ऋतं चेति तृचं जपन् अघमर्षणं कुर्यात्· ततः प्रवाहाभिमुखस्त्रिवारं मज्जेत्· इति मृत्तिकास्नानं· तत· आपोहिष्ठेति तृचेन शुद्धोदकस्नानं कुर्यात्· अथ पंचगव्यस्नानानि· गायत्र्या गोमूत्रेण· गंधद्वारामिति गोमयेन· आप्यायस्वेति क्षीरेण· दधिक्राव्ण इति दध्ना· घृतं मिमिक्ष इति घृतेन· देवस्य त्वेति कुशोदकेन स्नानं कुर्यात्· देवस्य त्वेति मंत्रे अभिषिंचामीति वाक्यशेषः। स्त्रियो मंत्रकानि स्नानानि· एवं दशस्नानानि विधाय स्नानांगं तर्पणं कृत्वा धौते वाससी परिधाय द्विराचम्य विष्णूद्देशेन त्रिभ्योधिकान्युग्मान्ब्राह्मणान्पूजापूर्वकं भोजयेत्· आमान्नं वा दद्यात्· इदमेव प्रायश्चित्तांगं विष्णुश्राद्धमित्यभिधीयते· गवामंगेषु तिष्ठंति भुवनानि चतुर्दश· यस्मात्तस्माच्छिवं मे स्यादितः शांतिं प्रयच्छ मे इति मंत्रेणादि गोदानं प्रत्यक्षं निष्कद्वारा वा कुर्यात्· ततोग्निस्थापनादि पूर्वं· अन्वाधानं केचिदिच्छंति· पापा

हंआज्येनव्याहृतिभिः पापहाविष्णूद्देशेनअष्टाविंशतिरष्टोत्तरशतंवाआहुतीर्जुहुयात्· ततःपचग
व्यंकार्यं· सुवर्णादिपात्रेपनपात्रेवाताम्रेवा गोमूत्रंत्रिपलंगायत्र्याप्रणवेनचादायततोंगुष्ठार्धपरिमि
तंश्वेतायाः गोमयंगंधद्वारेत्यादायततः कपिलापयः सप्तपलान्यादायआप्यायस्वेतिमंत्रेण· त
तोनीलायाः सप्तफलमेवदधिदधिक्राव्णइत्यादायततः कृष्णायाः घृतमेकपलैंघृतंमिमिक्षइत्या
दायततः एकपलंकुशोदकं आपोहिष्ठेत्यादायप्रणवेनालोड्यप्रणवेनयज्ञियकाष्ठेननिर्मथ्यप्र
णवेनाभिमंत्र्यसप्तमंत्रैर्हरितैः कुशैर्दशाहुतीर्जुहुयात्। एभिर्मंत्रैः। इरावतीधेनुमतीहि· स्वाहा·
पृथिव्याइदं· इदंविष्णुः विष्णवइदं· मानस्तोकेस्वाहा· रुद्रायेदे· ब्रह्मजज्ञानं· ब्रह्मणइदं· अग्न
येस्वाहा· सोमायस्वाहा· गायत्र्यासूर्यायस्वाहा· प्रणवेनप्रजापतयेस्वाहा· ॐ भूर्भुवः स्वाहा·
प्रजापतयइदं· अग्नयेस्विष्टकृतेस्वाहा। व्रतग्रहणंकरिष्यइतिद्विजान्पृष्ट्वातैः कुरुष्वेत्यनुज्ञातः प्र
णवेनसर्वंपिबेत्· एतच्चग्रामाद्बहिर्नद्यास्तीरेनक्षत्रदर्शनेकार्यं· अशक्तौगोमूत्रादिस्वल्पंग्राह्यं·

सर्वस्यपेयत्वात्· अस्मिन्दिनेउपवासः शक्तस्यान्यस्यहविष्याशनंइतिपंचगव्यंप्राश्यगृहेआगत्य
१२ विष्णुंस्मरन्मौनेननिशामतिवाह्यप्रेक्षांतंप्रायश्चित्तंसंकल्प्यानुसारेणप्रत्याम्नायद्वाराकृत्वा।उत्त
रांगानिकुर्यात् व्याहृतिभिराज्यंपूर्ववद्धुत्वापूर्ववत् पुनःप्रायश्चित्तांगंविष्णुश्राद्धंकृत्वाअंतेगोदानं
कुर्यात्· एवंतत्सर्वंप्राजापत्यसाधिकप्रायश्चित्तेविषयेनत्रिरात्रेतत्रतूपोषणत्रयमनुष्ठेयमित्याहुः।
शक्तंप्रतिचांद्रायणाद्युपदेष्टव्यं· चांद्रायणेत्रयःप्राजापत्याः। इत्यनाहिताग्निनाप्रायश्चित्तेकृतेस्मा
र्तकृच्छ्रादिप्रायश्चित्तेअमावास्यायांपूर्णिमास्यांवाकृतप्रातरौपासनहोमःश्मश्रुपक्षलोमनखानि
वापयित्वास्नानपवनमंत्राचमनमंत्रप्रोक्षणपुण्याहवाचनानिकुर्यात्· पुण्याहेदेवादित्यादयः
प्रीयंतांइतिविशेषः।अग्न्यादयइतितंत्रकृत्· ततःपश्चादौपासनस्यदर्भेष्वासीनो दर्भान्धारयन्प्रा
णोस्यातांप्राणानायम्यदेशकालौसंकीर्त्यएनोनिबर्हणेनाधानादिकारसिद्धिद्वाराश्रीपरमेश्वरप्री
त्यर्थंकूष्मांडैर्होष्यामीतिसंकल्पंकृत्वाअन्वाधानेचक्षुषीआज्येनेत्यंतेसवितारंचरुणादेवा

२५

नादित्यान् विश्वान् देवांद्यावापृथिव्यौसरस्वतीं च इंद्राग्निमित्रावरुणसोमधातृबृहस्पतीन् जातवेदसं
गार्हपत्यं· अग्निं ज्योतिं वा· अग्निं· गार्हपत्याग्निं· अग्निंगार्हपत्याग्निं· अग्निंगार्हपत्याग्निं· अपः
शुंधनीः। आपोहिरण्यवर्णाः अपो वा· वरुणं २ अग्नीवरुणौ· अग्निमयसं· अग्नेंद्रौ· अग्निं वा· उ
ग्रंपश्या राष्ट्रभृतावप्सरसौ· अप्सरसौ वा उग्रंरसौ· उग्रंपश्या राष्ट्रभृतावेव वा· वरुणं· ४ अग्नीव
रुणौ· संकुसुकविकुसुकनिर्दृथनिः स्वनान्· अग्निं· त्वष्टारं· अग्निमायुष्मंतं· अग्निमेव वा· आ
युर्दामग्निं अग्निं वरुणमदितिं विश्वान्देवान् अग्निं ३ अग्निं जातवेदसं· जातवेदसं अग्निं वृ
त्रहणं अग्निं· उषसं· निम्रुचं· देवान् जातवेदसमग्निं· अग्निं ३ वैश्वानरं· त्विषिं चतुर्वीरं· ४ अ
ग्निमभ्यावर्तिनं चतुर्वीरमाज्यद्रव्येणशेषेण स्विष्टकृतमिध्मसंनहनेत्यादिपूर्णपात्रनिधानांतं
स्थालीपाकवत् कृते शूर्पे पवित्रे निधाय तत् षष्टी चतुरो मुष्टीन्निरूप्य तत् षष्टी चतुर्वारं प्रोक्ष्यावघाताद्या
ज्यभागांते कृते वदानधर्मेण दायगायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्री छंदः। चरुहोमे वि

२६

नियोगः ॐ तत्सवितुः दयात्नू तत्सवितुः प्रचोदयात्स्वाहाः सवित्रइदं· भूर्भुवः स्वरोमित्सनुद्रुत्स तत्सवि
तुरित्येतयास्वाहांतयाजुहुयादितितंत्रकृत्· स्विष्टकृतमवदायहव्युवाहमभिमानिषाहंरक्षोहणं
१३ पृतनासुजिष्णुं· ज्योतिष्मंतंदीद्यतंपुरंधिमग्निंस्विष्टकृतमाहुवे मोंस्विष्टमग्ने अभितत्पृणाहि विश्वा
देवपृतना अभिष्य· उरुंनः पंथांप्रदिशन्विभाहि ज्योतिष्मद्धेह्यजरंनआयुः स्वाहा। अग्नये स्विष्टकृ
त इदं· अथयद्देवादेवहेलनमित्यादिमंत्रैराज्याहुती र्जुहुयात्·स्विष्टकृतमवदायअंतः परिधिसाद
यित्वा यद्देवस्याद्याज्याहुतीर्हुत्वा स्विष्टकृद्धोमादिकार्यमितितंत्रकृत्· यद्देवादेव· मित्तस्वाहा· दे
वेभ्य आदित्येभ्य इदं· देवा· तस्मान्त· यसः स्वाहा। विश्वेभ्योदेवेभ्य· स्त्रेनेन· कृतान्नः पात्वेनसो
यत्किंचानृतमूदिमस्वाहा· द्यावापृथिवीभ्यांसरस्वत्याइद· इंद्राग्नीमित्रावरुणौसोमौ· रिमस्वाहा·
इंद्राग्निमित्रावरुणसोमधातृबृहस्पतिभ्यः। सजातशंसा· अनाधृष्टंदेवकृतं· मुमुग्धिस्वा
हा· जातवेदसे· वद्वाचा· चकृमयानिदुष्कृतास्वाहा· गार्हपत्याग्नये· अग्नयेगार्हपत्यायेतितं

त्रकृन् · येनत्रितो · आक्षिस्वाहा · अग्नये · ज्योतिषे · यत्कुसीद · दधामिस्वाहा · अग्नये · यन्मयि ·
मामनेनसंस्वाहा · गार्हपत्याग्नये · यद्दापिपेष · भवामिस्वाहा · अग्नये · यदंतरिक्षं · मामनेनसंस्वा
हा · गार्हपत्याग्नये · यद्दाशसा · मामनेनसंस्वाहा · गार्हपत्याग्नये · अतिक्रामामि · अग्नये · त्रिते ·
गार्हपत्याग्नये · दिविजाता · अद्भ्याः शुंधनीभ्यः । यद्दापो · अद्भ्योहिरण्यवर्णाभ्यः । उभयत्रा
अप्स्विस्सेववा · इमंमे · वरुणाय · तत्वायामि · वरुणाय · त्वंनो · अग्नीवरुणाभ्यां · सत्वंनोअग्ने ·
त्वमग्ने · अग्नयेअयसे · यददीव्यं · अग्नेंद्राभ्यां · यद्धस्ताभ्यां · उग्रंपश्याराष्ट्रभृद्भ्यामप्सरोभ्यां ·
अप्सरोभ्यइस्सेववा · उग्रंपश्येराष्ट्रभृन् · उग्रंपश्याराष्ट्रभृद्भ्यां · अवतेहेलो · वरुणाय · उदुत्त
मं · वरुणाय · इमंमेतत्वायामित्वंनोअग्नेसत्वंनोअग्ने · संकुसुकोसंकुसुक विकुसुकनिर्ऋथ
निःस्वनेभ्यः । निर्यक्ष्ममचीचते · अग्नये · दुःशाऽसानुशाऽसा · अग्नये · संवर्चसा · त्वष्ट्रे ·
आयुर्दाः आयुष्टे · अग्नये · आयुर्दाग्नये · इममग्ने · अग्नयेवरुणायादित्यैविश्वेभ्योदेवेभ्यइदं ·

अग्नआयूꣳषि·अग्नये· अग्नेपवस्व·अग्नये·अग्निर्ऋषिः अग्नये· अग्नेजातान्· अग्नयेजा
१४ तवेदसे· सहस्रसाजातान्· जातवेदसे· अग्नेयोनोभितोजनो· अग्नयेवृत्रघ्ने· अग्नेयोनो· अग्नयेः
योनः शापादशपतोः उषसेनिम्रुचे· योनः सपत्नोयो· देवेभ्यइदं· योमांद्वेष्टिजातवेदो·जातवेदसे
ग्नयेः योअस्मभ्यमरातीया· अग्नये·संशितं·अग्नये· उद्वेषां · अग्नये· पुनर्मनः पुनरायुर्मआ
गावैश्वानराय· सिꣳहेव्याघ्रे· त्विष्ये·याराजन्ये· त्विष्ये· याहस्तिनि· त्विष्ये· अरथेअक्षेषु· ति
ष्ये·अग्नेभ्यावर्तिनिः अग्नयेभ्यावर्तिनेः अग्नेअंगिरः। अग्नयेभ्यावर्तिनिः पुनरूर्जानिवर्तस्वः अ
ग्नयेभ्यावर्तिनिः सहरय्यानिवर्तस्व·अग्नयेभ्यावर्तिनि· अथयजमानः आसनेतिष्ठन्नुस-मिधा
ग्निंवैश्वानरायप्रतिवदयामइतिद्वादशर्चेनसूक्तेनउपस्थाययन्मयामनसावाचेतिसमिधमग्नो
जुहुयात्· वरदानंच·पूर्वस्विष्टकृदकरणेपूर्वमिवावदायस्थापितमस्मिन्समयेपूर्वोक्तमंत्राभ्यां
हुत्वासन्नहनहोमादिहोमशेषंसमाप्यअग्नेणाग्निमश्वत्थपर्णेषुकु नशोषंनिदधातिइतिबोधा

यनोक्तः कूष्मांडहोमः। अथजमदग्निप्रोक्ततत्प्रयोगः। तत्रनचरुहोमः। सवितोरंचरुणात्तिषिमभ्या
वर्त्तिनइसेनहूर्जमन्वाधानंपूर्ववत्पूर्णपात्रनिधानांतेआज्यसंस्कारादिआज्यभागांतेयद्देवेतित्रि
भिरनुवाकैराज्यहोमः।न[illegible]सिꣳहेव्याघ्नइत्साद्याकुनयः।अनुवाकत्रयांतेवैश्वानरायेसुपस्थायस
मिधमाधायआज्येनस्विष्टकृतंकृत्वाकर्मशेषंसमापयेत्‌· एवमन्यतरपक्षेणसंवत्सरंमा
संचतुर्विंशतिरात्रीः षड्रात्रीः तिस्रोरात्रीर्वाजुकुर्यात्‌· यावत्समाप्तिपयएवभुंजीत·ओद
नादिहविष्यंवा· अथसंक्षेपेणगणहोमप्रयोगः संवत्सरमयनमृतुंमासंपक्षंसप्ताहंत्र्यहमेका
हंवासवनत्रयंकार्यः।एनोनिबर्हणेना।आधानाधिकारसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंग
णहोमान्होष्यामीतिसंकल्प्यान्वाधानेबौधायनमतेसवितारंचरुणाग्निंईजगद्बीजंपुरुषंना
रायणं १८ पुरुषमेवनारायणमेव·पुरुषंनारायणमेववा· अग्निमꣳहोमुचंद्वि· इंद्रमꣳहोमुचं
द्वि· मित्रावरुणावागोमुचौद्विर्वायुसवितारावागोमुचौद्विरश्विनावागोमुचौद्विर्मरुतएनोमुचो

द्विर्विश्वान्देवानेनोमुचो द्विरनुमतिं निर्है ~~च सहसाग्निमनुमितिं द्विरिते च वा~~ वैश्वानाराग्निं द्वि घीवांपृथिवीअ
१५ ९ होमुचौ द्विरग्निं रिंद्रावरुणावं९ होमुचौ ४ अं९ होमुगादि विशेषणारहिताउक्ताः सर्वदेवता वा· इंद्रा
वरुणौ तयोरग्न्यादिषु स्नामं वा ८ पावमानीः सप्तदशावारं· अथवारैयवमानुं सुवर्जनं विचर्षणि
पोतारं देवयजनमनु विश्वायून्‌ जातवेदसमग्निं· अग्निंदेवं सवितारं· सवितारमेव वान्पेश्व
देवीं पुनंतीं देवीं वैश्वदेवीमेव वा वैश्वानरवाने बिरं मयोभुवं· द्यावापृथिवी स्तनावरी सवितारम
ग्निं च· प्रत्नपावमानीः षड्ढारं· ब्रह्म· इंद्रं सुनीलासहितमिंत्सेव वा· देवानादित्सान्‌· अग्निंगार्ह
पत्यं· द्यावापृथिवी सरस्वतीं जातवेदसं· अग्निंगार्हपत्यं· दूरेपश्याराष्ट्रभृतावप्सरसः अग्नि
गार्हपत्यं २ अग्निं· अग्निंगार्हपत्यं· अग्निं· अग्निंगार्हपत्यं· अपः शुंधनीः अपोहिरण्यवर्णाः उ
पएव वा वरुणं २ अग्नीवरुणौ अग्निमयसं अग्निं वैश्वानरमष्टवारं च वरुणाशेषेण स्विष्टकृता
स्यादि· आपस्तंबमतेतु सवितारं च रुणैसस्य लोपः पात्रप्रयोगे प्रणीतापात्रेण सहतुं नुभिर्वेदि

3/2

नंकेशंर्मेल सुनक्ति· प्रणीताआसाद्यकलशे पवित्रेनिधाय आनीयोत्सूयप्रणीतानरलो निदधाति· नि
र्वापकालेकरिष्यमाणाङ्कुनिचतुर्गुणसंख्ययानिर्वापंप्रोक्षणंच तूष्णींकुर्यात्· आज्यभागांतेदर्व्या
चतुरवत्तमादायाग्नेवय· प्रवः शुक्राय· अछागिरो· अग्नेत्वमः अग्नेत्वंयारस्याः प्रकारवोमनना·
एतेनअग्नयइदंनमम इतित्यागः सहस्रशीर्षा· पुरुषएवेदं॥ एतावानस्य· त्रिपादूर्ध्व· वास्तुनः
तस्माद्विरा· यत्पुरुषेण॥ सप्तास्यासन्· तंयज्ञं· तस्माद्यज्ञा· तस्माद्यज्ञा· तस्मादश्वा· यत्पुरुषं॥
व्यदधुः। वूरुपादावुच्येते· ब्राह्मणोस्य· चंद्रमा· नाभ्याआसीः वेदाहमेतं· धातापुरस्ता· यज्ञेनय
ज्ञं· एतेषुंप्रत्येकंपुरुषनारायणायेदमितित्यागः अग्निर्मन्वे· अग्नयेअंहोमुचइदं· य
स्येदं· अग्नयेअंहोमु· इंद्रस्यमन्वे· इंद्रायांहो· यः संग्रामंनयतिसं· इं· हो· मन्वेवांमित्राव
रुणा· मित्रावरुणाभ्यामागोमुग्भ्यामिदं· योवांरथः मित्रावरुणाभ्यामागोमुग्भ्यामि
दं· वायोः सवितुः वायुसवितृभ्णमागोमुग्भ्यामिदं· उपश्रेष्ठान· वायुसवितृभ्यामागोमुग्भ्यामिदं·

रथीतमो रथीना· अश्विभ्यामागोमुग्भ्यां· यदयानं वहतुं· अश्विभ्यामागोमुग्भ्यामिदं· मरुतांमन्वेअ
धि· मरुद्भ्यएनोमुग्भ्याइदं· निग्ममायुधं· मरुद्भ्यएनोमुग्भ्य· देवानांमन्वे· विश्वेभ्योदेवेभ्यएनोमुग्भ्य
इ· यदिदंमाभि· विश्वेभ्योदेवेभ्यएनोमुग्भ्य· अनुनो· अनुमत्याइदं· अन्विदनुमः अनुमत्या· वै
श्वानरोन· अग्नयेवै· पृष्टोदिवि· अग्नयेवै· येअप्रथेताम· द्यावापृथिवीभ्यामागोमुग्भ्या· उवइ
रो· द्यावापृथि· यतेवयं· अग्नयइ· यथाहतद्वस· अग्नय· यावामिंद्रावरुणायतव्यातनू· योवा
मिंद्रासहस्यातनू· यावामिंद्रावरुणारक्षस्या· यावा· तेजस्या· एतेषुचतुर्षुइंद्रावरुणाभ्यामंऽहोमु
ग्भ्यामितित्यागः। योवामिंद्रावरुणावग्नौस्त्रामस्तंवामेतेनावयजेस्वाहा। इंद्रावरुणावग्नौस्त्रामाये
दं· योवामिंद्रावरुणाद्विपात्सुपशुषु· मित्रा· द्विपात्सुपशुषु· ये· योवा· चतुष्पात्सु· मित्रावरुणायो·
चतुष्पात्सुपशुषु· योवामिंद्रा· गोष्ठेषु· गोष्ठेषुस्त्रामायेदं· योवा· गृहेषु· गृहेषुस्त्रामायेदं· यो
वामिंद्रावरुणायो· रप्सुस्वाहा· इंद्रावरुणायोः रोषधीषुस्त्रामा· योवा· वनस्पतिः स्वाहा· वन

स्पतिषुस्त्रामैयि· पवमानः सु· पवमानायसुवर्जनायपवित्रायविचर्षणेसोत्रायेदं· पुनंतुमादेवय· दे
वयजनमनुविश्वायुम्य· जातवेदः पवित्रजातवेदसेग्न· यत्तेपवित्रम· अग्नय· उभाभ्यांदे
वसवितः देवायसवित्रेब्रह्मणे· वैश्वदेवी· वैश्वदेव्यैपुनत्याइदं· वैश्वानरोरश्मि· वैश्वानरवातेभि
रद्यावापृथिवीऋतावरीभ्यइ· वृहद्भिः सवितस्तृः सवित्रेग्नयइ· येनदेवाअ· ब्रह्मणइदं· यःपा
वमानीरध्ये· पावमानीर्यो· तस्मैसरस्वती· पावमानीः स्वस्त्ययनीः। सुदुघाहिपयस्वतीः ऋषि
भिः सं· पावमानीर्दिव्रांतुनः इमं· पावमा· घृतश्श्चुतः। येदंनदेवाः पवित्रेण· एतेषां· पावमानी
भ्यइदमितिस्थागः। प्राजापत्यें· ब्रह्मणइदं· इंद्रः सुनीतीसहमापुनातु· इंद्रायसुनीत्यैसोमा
यस्वस्त्यैयेवरुणायसमीच्यैयमायराज्ञेप्रमृणाभ्यांजातवेदसऊर्जयंत्यासहितायेदं· यद्देवादेव
हेडनं· देवेभ्यआदित्येभ्यइदं· देवाजीवनकाम्या· अग्निर्मा· चरूमयानि· अग्नयेगार्ह
पत्यायेद· ऋतेनद्यावा· ऋतान्मा· द्यावापृथिवीभ्यां· सजातशंसा· जामि· अनाज्ञातं·

१७ जातवेदसइदं· यद्वाचा यन्मन· अग्निर्मा· अग्नयेगार्हपत्याये· यद्धस्ताभ्यांचकर· हरेमइपाराष्ट्रभृ
मप्सरोभ्यः। अदीव्यंनृणंयदहंचकार· अग्नीन्द्राभ्यामिदं· यन्मयिमाता· अग्नयेगार्हपत्यायेदं·
यद्यापिपेष· अग्नयइदं· अग्नयेगार्हपत्याये· यदाशसा· अग्नय· अतिक्रामा· अग्नय· त्रितेदेवा·
अग्नयेगार्ह· दिविजाता· अद्भ्यःभुंधनीभ्यः यदापो· अद्भ्योहिरण्यवर्णाभ्य० इमंमे· तत्वाया
मि· वरुणायेदं· त्वंनोअग्ने· सत्वंनोअग्ने· अग्नीवरुणाभ्यामिदं· त्वमग्नेअया· अग्नयेअ
यस· वैश्वानरोन· ऋतावानं· वैश्वानरस्यदंसना· पृष्टोदिवि· जातोयदग्ने· त्वमग्नेशोचिषा·
अस्माकमग्ने· वैश्वानरस्यसुमतौ· इत्यष्टसुवैश्वानरायेदमितित्यागः इत्येवमंत्रैर्जुहुयादि
त्यापस्तंबीयं· बौधायनमतेतुतदंतेचतुरवत्तं पूर्ववद्गायत्रीमनूच्यगायत्र्याकृत्वामेक्षणेनोपघा
तंजुहोतिमेक्षणेप्यवदानधर्मेणावदायजुहुयादितिकेचित्· गायत्र्युनरन्नंचरुहोमं
कृत्वाव्याहृतिभिरुपहोमंकृत्वास्विष्टकृदादिसमाप्यसादितकलशाभ्यामादायचतुष्पथंग

35

त्वा सिं॰ हे मे मन्युरित्यादिमंत्रद्वये पितुस्त्वं· अंतेण यज्ञेसेन ब्राह्मणान्भोजयित्वा गोहिरण्यादिदि
घादित्रिगणहोमः। अत्रादीत्थमनंतरेन कूष्मांडगणहोमयोः। प्रयोगस्तेन योगेशः प्रीयतां सर्व
यज्ञभुक्। अथाधानपूर्व। दिनात्पूर्वेद्युः रात्रौ पुण्याहं वाचयित्वा श्वोभूते नांदीश्राद्धं कुर्यात्·
तंत्रकृदुक्तेः। तच्चापराह्ले पार्वणं स्यान्नांदीश्राद्धं तथाग्निकमिति निर्णयामृतोक्तेः। दक्षक्र
तूवैश्वदेवौ· कर्मांगश्राद्धे तयोरेव विहितत्वात्· रात्रावुदकशांतिं प्रतिसरबंधं च कुर्या
त्· रात्रौ तंत्रेण कुर्यात्· तथाहि· पादौ प्रक्षाल्याचम्य प्राणानायम्य तिथ्यादि संकीर्त्य आधानां
गभूतामुदकशांतिं प्रतिसरबंधं च तंत्रेण करिष्ये इति संकल्प्य गोमयेन गोचर्ममात्रं चतुरस्रं
उपलिप्य दर्भेणायज्ञांगकाष्ठेन वा तूष्णीमुद्धत्याद्भिस्तूष्णीमवोक्ष्य तत्र पंचप्रस्थव्रीहीणां तंदु
लानां वा स्थंडिलं कुर्यात्· स्थंडिलमध्ये प्रतीचीमारभ्य प्राचीपर्यंतं ब्रह्मजज्ञानमित्यृचा दर्भे
णलेखां कुर्यात्· स्थंडिलोपरि दक्षिणतः नाके सुपर्णमित्यृचा पूर्ववल्लेखां कुर्यात्·

स्थंडिलोपर्युत्तरत आधायस्वेस्तृचापूर्ववत्तु· स्थंडिलमध्येदक्षिणमारभ्योदीचीपर्युत्तंयोरुद्रोअ
१८ ग्नाविस्तृचापूर्ववत्‌· स्थंडिलस्याग्नेयकोणमारभ्येशानीपर्यंतंइंद्रंविश्वाअवीवृधन्नितिपूर्ववत्‌
देवस्य· माददद्दइसादायभूर्भुवः सुवरितिदर्भस्थंडिलादुत्तरतो निरस्यस्थंडिलादुत्तरभागेप्रागग्रा
न्दर्भान्‌ संस्तीर्यतेषुप्रोक्षणीमुदकुंभंपंचप्रस्थपवपूर्णंकांस्यपात्रेसूत्रद्वयंचसादयित्वासादितानिद
र्भैः प्रच्छाद्यपवित्रंकृत्वाप्रोक्षणीमुत्तानीकृत्वाप्रोक्षण्यांपवित्रउदकुंभंउत्तानंकृत्वापवित्रेणप्रोक्ष्य
कांस्यपात्रस्थसूत्रद्वयंचप्रोक्ष्यउदकुंभंसुगंधद्रव्येणधूपयित्वास्थंडिलोपरिप्रागग्रान्‌दर्भाना
न्स्तीर्यगंधोदकेनाभ्युक्ष्यपुष्पैः फलैश्चावकीर्यतत्रोदकुंभंनिधायतस्योपरिपवित्रमुदग्रंनि
धायउदकुंभंब्रह्मजज्ञानमित्यृचानिदधाति· उदकुंभेतत्सवितुर्वरेण्यमित्यृचायवाक्षतान्तंडु
लानापपतिउदकुंभस्यसमंतात्‌ भूर्भुवः सुवरितिपुष्पदूर्वाफलान्यवाकिरेत· उदकुंभंदूर्वाद १
र्भैः प्रच्छाद्य· उदकुंभस्यपुरस्ताद्देवस्यत्वेतिदर्भानुदगग्रान्परिस्तीर्यउदकुंभस्यदक्षिणतोव्याह

ति: पश्चिमतउद्वयं तमसस्परीतिउत्तरतअग्नआयाहिवीतयइति परिस्तीर्य दर्भान् अस्मिन्कर्मणि
पूर्वस्यां दिशि जपकर्तारं त्वां वृणे· दक्षिणस्यां· पश्चिमायां· उत्तरस्याइति चतुरो ब्राह्मणान् वृणुया
त्· यजमानो वृत ब्राह्मणाश्च दर्भहस्ताः कुंभं दर्भाग्रेणस्पृशंनोजपंति· शंनोदेवीरितिऋचं· प्रणव
व्याहृतीरुक्त्वा तत्सवितुर्वरेण्यमिसृचं पच्छोर्धर्चशः सर्वाजपंति· अग्निमीळेपुरोहितंऋचा। इ
षेत्वोर्जेत्वा· अग्न आयाहिवीतये· शंनोदेवीरिति दैवोदासीन्· कृणुष्वपाजः प्रसितिं न पृथ्वीमित्यनु
वाकः। इंद्रं वो विश्वतस्परीत्यनुवाकः। यत इंद्र भयामहइति सूक्तं· महाँ इंद्रो वज्रबाहुः १ सजोषा
इंद्र १ येदेवाइति पंच· अग्नये रक्षोघ्ने स्वाहेति पंच· अग्निरायुष्मान्· यावामिंद्रावरुणं चत्वारि· यो
वामिंद्रेतिचाष्टकं· अग्नेयशस्विन्· ४ ऋताषाडृतधामाग्निः। नमो अस्त्विति त्रयः अयं पुरो हरिके
शः आशुः शिशानः। शं च मे मयश्च मइत्यनुवाकः। ममाग्ने वर्चः। अग्नेर्मन्वे· समीचीनामासि·
हेतयो नामस्थ· ६ शंतायुधायेत्यनुवाकः। भूतं भव्यं भविष्यत्· अथब्राह्मणं· इंद्रोदधीचइस

नुवाकं· चक्षुषोहेते· भ्रातृव्यंपादयामसीत्संतं· प्राणोरक्षतिविश्वमेजदित्सनुवाकः।सिंहेव्याघ्रउत
यापृदाकौइत्सनुवाक· अहमस्मिप्रथमजाऋतस्येत्सनुवाकः।तासूर्याचंद्रमसेत्सनुवाकाः।अग्निर्नः
पातुकृत्तिकाइत्सनुवाकः।ऋध्यास्म·नवोनवः।अग्नयेस्वाहेतिसर्वान्· दधिक्राव्णो·आपोहिष्ठा·य
श्चिद्धिते·हिरण्यवर्णाः४ऋ· पवमानःसुवर्जनइत्सनुवाकः तच्छंयोः नमोब्रह्मणे· उदुत्तमंवरुण·
शांतिः।इमंमेवरुणतत्वायामित्वंनोअग्नेसत्वंनोअग्नेसत्वंनोअग्नेसत्वंनोअग्नेत्वमग्नेअयासि·
परित्वोरुद्रस्य·मीढुष्टम· विकिरिदविलोहित· सहस्राणिसहस्रधा· पिताविराजा·इत्यादिब्रह्मसमि
द्धवसाकुतीनामित्संतं· विष्णोनुकं· जातवेदसे· ताभग्निवर्णां· अग्नेत्वंपारया· विश्वानिनो· पृतना
जितं· हिरण्यवर्णामितिश्रीसूक्तं · तच्छंयोरावृणीमहे· ॐ नमोब्रह्मणे· इतित्रिवारंजपित्वाप्रणवे
नोदकुंभमुत्थाप्यप्रणवत्रिरुच्चार्यपुनरुदकुंभंतत्रैवस्थाप्यवृताब्राह्मणाः सपत्नीकंयजमानंउ
दकुंभोदकेनदर्भाग्रैः व्याहृतिभिः प्रोक्षंति· अथब्राह्मणाः सूत्रमादायवासुकिध्यात्वांत्र्यंबक

मंत्रेणत्रिरूर्ध्वभस्मनासूत्रद्वयमालिप्यअग्निरायुष्मानितियजमानस्यदक्षिणंहस्तंगृहीत्वोंब्रह्मसाम
तिमंत्रेणतत्रसूत्रंबध्नीयात्॰ पत्न्याअपिवामहस्तेतद्वद्बध्नीयात्॰ बंधनसूत्रस्थानेभस्मानायोब्र
ह्मणइत्सष्टर्चेनरक्षांकुर्यात्॰ यजमानोवृतब्राह्मणेभ्योदक्षिणांदद्यात्॰ तत्रक्रमः पुरतस्थिताय
ब्राह्मणायहिरण्यं॰ दक्षिणतस्थितायरजतं॰ पश्चिमस्थितायकांस्यं॰ उत्तरस्थितायवासः। सर्वाभावेहि
रण्यं॰ इत्युदकशांतिप्रतिसरबंधौविधायश्वोभूतेप्रातरौपासनहोमंकृत्वैकविंशत्यादर्भपिंजूलै
स्त्रिधाविभक्तैः कंठादूर्ध्वमुन्मृज्यनाभेरुपर्याकंठं॰ नाभेरधस्तान्गुल्फमितित्रिरोनाभिगुल्फदेशे
ष्वपावयित्वाप्रोक्ष्योदङ् निरस्यापउपस्पृश्यआपोहिष्ठेतितिसृभिःप्रत्येकमपःपीत्वाव्याहृतिभिःप
म ३ रिमृज्यत्रोर्ध्वमार्जनंस्मार्तविधिनासमाप्यसयजमानानृत्विजोमंत्रप्रोक्षणंकुर्युः। मंत्राः दधिक्रा
व्णाः। आपोहिष्ठेतितिस्रः। यच्चिद्धीति॰ हिरण्यवर्णाइतिचतस्रः। पवमानइत्यनुवाकेनप्रसृचं॰
कयानः। तरत्समंदीतिचतस्रः। अंतेव्याहृतिभिरितिः पत्न्यप्येवंपवनादित्रयंकुर्यादितितंत्रकृत्॰

देवस्तुपरिमृज्यस्मार्त्ताचमनंकृत्वामंत्रैर्जलमभिमंत्र्यशिरसिप्रक्षिप्यमंत्रप्रोक्षणंकुर्युरित्याह· मंत्रेषुच
२० पवमानः स्सनुवाकांतेमहाव्याहृतिभिस्तिसृभिः सप्तभिर्वाद्रुपदयाकयानश्चित्रआभुवदितितिस्रः। अ
वतेहेळः। त्वंनंचसत्वंचेतितिस्रः। नरत्तमंदीति· चनस्त्वइति विशेषमाह। अनुवाकांतेव्याहृतिभिर
न्यैश्चपवित्रमंत्रैः प्रोक्षणं· पत्न्याअध्वर्युः प्रोक्षितेसाहकेशवः। ततः पुण्याहेअग्निः प्रीयतामितितं
त्रकृत्वा· अग्न्यादयः प्रीयंतामितिदेवः। यद्दैवसंभवतितस्यनामगृहीत्वासप्रीयतामितिस्मार्त्ते· ततः
औपासनस्यपश्चाद्दर्भेषुदर्भपाणीपत्नीयजमानावुपविशतः पत्न्याउत्तरतः पतिः। ऋत्विजस्तयो
रुत्तरतः प्राङ्मुखाः। यजमानः प्राणानायम्यविष्णुंध्यात्वादेशकालौसंकीर्त्याः पुरस्तादित्यादि
निविषृमिसंतेआधानकालसंकल्पपूर्वकंसर्वकामसिद्धिद्वाराश्रीपरमेश्वरप्रीतिकामः अग्नी
नाधास्यइतित्रिरुपांशुत्रिरुच्चैर्वदेत्· अत्रत्रिकांडमंडनः प्राणानायम्यसंकल्पसपत्नीरुपवि
श्यच· तदर्थमग्नीनाधास्येयत्रशक्तोधिकार्यहं· वसंतेमुकनक्षत्रेयदिवामुकपर्वणि०

५७

ततस्तत्समृध्यतामित्युक्ते ऋत्विजस्तत्तं ऋध्यतामित्यादिब्रूयुः। ॐ तथेत्यंते आश्वलायनोक्तो
वरणमधुपर्कौ कार्यौ। ततो देवयजनयाचनं वैकल्पिकं। याचेत्तदा देशमथोपपन्नैरिति कल्पात्।
ततः सर्वोऽप्यृत्विक् अहतं वासः परीधाय शुचिः पूतो मेध्यो विपाप्मा ब्रह्मचारी सहकारिस्वस्वयः आच
तुर्थ्यादिभिः समीक्षमाणः आर्त्विज्यं करिष्यन् जघनेन गार्हपत्यमुपविश्य पेज देव ऊ इति जपेत्।
ततो ब्रह्मा तीर्थेन प्रविश्य मंत्रेण निरसनोपवेशने कुर्यात् ब्रह्मजपं। अथाध्वर्युः स्फ्यमादाय वेद्यु
त्करयोर्मध्येन प्रपद्य आयतनानांशोत्वमानं कृत्वा यजमानपत्नीभ्यामन्वारब्धः जघनेन गा
र्हपत्यं तिष्ठन् प्रागवसानं गार्हपत्यायतनमुद्धंति। उद्धन्यमानमस्या अमेध्यमपपाप्मानं यजमा
नस्य हंतु। शिवा नः संतु प्रदिशश्चतस्रः शं नो माता पृथिवी तोकसाता। अपः स्पृश्य अस्मिन्का
ले दंपत्योस्तीर्थप्रवेशमूचतुस्तत्र कद्देवौ। पूर्वमेव यजमानः प्रपद्यास्ता इति केशवः। उद्ध
ननप्रभृति विराजक्रमोपस्थानांतं सहयाजमानेमिति च सः। आयतनसंस्कारमंत्राः यज

मानो पिकूया दितिदेवः। उपविश्य यथेनमद्भिरवोक्षति· शंनोदेवीरभिष्टय इतिन्युब्जपाणितलेनसे
२१ कोवोक्षणं। उत्तानपाणितलेनसेकः प्रोक्षणं· विरलमुष्टिनासेकोभ्युक्षणमिति विभागमाह हरदत्तः।
एवमितरोयतनयोरुद्धननावोक्षणे· अथवेद्युत्करावंतरेणोदङ् निर्हृत्यपुरुषांतरैः सहसंभारा
नाहरंति· पूर्वमिवाहृतांनं नवेदिनिधायमंत्रैः संभरेद्वा· वैश्वानरस्येति सिकताः। यदिदंदिवइ
सूषान्· ऊतीः कुर्वाणइत्याखूत्करं· उर्जंपृथिव्याइति वल्मीकवपां· प्रजापतिसृष्टानामिति
सूद· यस्यरूपमितिवराहविहतं· यत्पर्युपत्स्यदितिपुष्करपर्णं· याभिरदः हृदितिशर्कराः।
अग्नेरेतइतिषुदुहिरण्यशकुलानि· अश्वोरूपमित्यश्वत्थं· उर्ज्जः पृथिव्याइत्सौदुंबरं· गाय
त्र्यादेवानामितिपर्णं· स्वयातइतिशमीं· यत्तेसृष्टस्येति वैकंकतं· यत्तेतांतस्येत्यशनिहतं· चि
त्रियादितिचित्रियस्यसमिधः· यातइतिमुंजकुलायं· अश्वत्थाद्धव्यवाहात्· याअश्वत्थइतिद्वाभ्या
मरणी· सुसंभृतानूयंत्वेतिमंत्रावृत्त्यापुनः क्रमेणसंभृत्यारणीमुंजकुलायचित्रियाहिरण्य

ग्राकलभिन्वा स्त्रिधा विभज्य त्रिषु पात्रेषु निदधाति· त्रिधाकृतानामूषाणां निहितसंभारैः संहतानान्
भेदेन स्थापयेत्· अश्वत्थाद्व्यवाहादिति द्वाभ्यां यं त्वेति च स्फ्यादियज्ञपात्रैः सह अरणी संभरे
त्· यद्वा उषादीनरण्यंतान्संभाराण्यज्ञपात्राणि सहैव यो अश्वत्थो यं त्वेति संभरेदिति देवः।
यं त्वेति केचित्· सर्वांन्ते संभरंति क्रमेण त्विति कल्पः। अथ गोपितृयज्ञः। विहारस्य दक्षिणत उप
रिश्रिते देशे प्राङ्मुखस्यासीनस्य यजमानस्य श्मश्रुवपनं कृत्वोपपक्षावुस्वा दक्षिणगोदा
नं प्रदेशे उर्ध्वाग्राणि त्रीणि दर्भपिंजूलानि उपनिपस्य केशावपनादि नखनिकृंतनांतं करो
ति· केशावपने मंत्रः वपेत्व वपेदिति· उप्तदेशं यजमानो भिमंत्रयते: यानि म इति· श्म
श्र्वादिवपने विशेषोपरार्के· उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः। केशश्मश्रुलोमन
खान्युदकसंस्थानि वापयेत्· दक्षिणं कर्णमारभ्य धर्मार्थमिति· पत्न्या अपि मंत्रवर्जं केश
मतिरिक्तोपपक्षादिवपनमिति तंत्रकृत्· नेत्यपि देवः यजमानमुदकुंभेनाभिषिंचन्वाच

यन्ति· इमामग्न्यापइति· नूढ्ढींपत्नीस्नापयन्ति· स्नानस्थानात्माङ्· उत्सृष्याहतेवाससीपरिधायमं
२२ षेणालंकारैणालंकृत्यांके· हरदत्तीयेवैश्वानरः। हेमभूषणसंपन्नः शुभवस्त्रानुलेपनः। सु
धिकुसुमैर्जुष्टा दिव्योलंकारउच्यते· सएवपुष्परहितः सांजनोमानुषः स्मृतः। एषोनुलेपरा
तः पैशोलंकारउच्यतइति· कर्मान्ते· उभौमानुषेणालंकारेणालंकृतौभवतोहतवाससावितिः
सर्वएवमानुषोळंकारान्स्मिन्नत्रनलदादाजायिवेतदुदाहरंतिस्रजमुहेकेप्रतिषेधयंतीतिः गंधपु
ष्पादिभिरलंकृत्यांजात्तइतितुकेशवादयः। पत्नीभूयस्त्वेसर्वासामप्यलंकरणादि· सोत्रे।
।द्विवचनंत्वाविव। क्षितमितिहरदत्तः। अथाध्वर्युरेकविंशतिपिंजूलैस्त्रेधाविभक्तैर्यजमा॰
यो: शिरोनाभिगुल्फदेशं पावयित्वा पात्रमादायनैर्ऋत्यांदिशिगत्वाचतुष्पथशुचिदेशे
निहितोदपात्रेआत्मानमवेक्षमाणं यजमानं सि॰ हेमेमन्युरित्यनुवाकं वाचयति· नूढं
पत्न्यपिवीक्षेतेतिभवादयः। ब्रह्मादक्षिणतसोआसीतेतिदेवत्तत्रकर्त्तो। ततोनैर्ऋत

45

दिश्यपो निनीयाप उपस्पृश्यानवेक्षमाणा आयंति· यानेप्रदक्षिणावृत्तिरायानेन द्विपर्ययइतिक॰
त्मः अपसव्यमावृत्त्यागमनेप्रदक्षिणमावृत्त्यागमनमव्यवायेतिभवः। हस्तपादप्रक्षालनाचमनानंतरं
पवमानः सुवर्जनइत्येतमनुवाकं यजमानं वाचयन्नात्मानं पत्नीयजमानौ चाद्भिः प्रोक्षति· अथयज
मानः प्राचीनावीती गोपितृयज्ञं करिष्येइतिसंकल्प्य लौकिकाग्निमिध्मेनौक्षितं मन्वाहार्यपच न
नेनिदध्यादितितंत्रकृत्· प्रायश्चित्तप्रदीपेतुगोपितृयज्ञार्थाग्निं लौकिकारणिभ्यां मथित्वाश्रो
त्रियागारादाहृत्य वायतनेनिधायपरिषिच्य परिस्तीर्याज्यं संस्कृत्य स्रुक्स्रुवं संमृज्याग्नौसमिधमाधा
यपुनस्त्वेति स्रुवाहुतिं जुहुयादिसूत्र· अथाग्निं प्रज्वलयित्वा परिस्तीर्य पवित्रे कृत्वाज्यस्था
लीस्रुवंचासाद्य प्रोक्ष्याज्यं संस्कृत्याग्नेरुत्तरतस्तदाज्यं चतुर उदकुंभानौदुंबरीं दर्वीश्च सा
दयेत्· दक्षिणतोग्नेः सकृदाच्छिन्नं बर्हिरिकोपबर्हणी आंजनाभ्यंजने लौकिकाज्यं स्फ्यं दक्षिणा
मतिरिक्तं सूत्रं· उलूखलमुसले· कृष्णाजिनं· शुर्पं· मेक्षणं· आज्यस्थाली: प्रोक्षणीमिति

दक्षिणामिति दक्षिणापवगमासादनं कुर्यात्· दक्षिणत उद्धत्यावोक्ष्येकोनपंचाशद्भीतकानस्तान्निध
२३ पनदक्षिणतः स्फ्येन दक्षिणापवर्गां रेखां करोतीति तंत्रकृत्· एवकादीनामग्नेश्च मध्ये सकृद्देवरे
रूपेणोद्धंतीति देवभवौ· संभारान् दक्षिणेनास्ताः संभारान्यंतरोद्धतिः। उद्धते वोक्षिते वास्तान्नि
पंति विचक्षणाः। दक्षिणे वापवर्गः स्यात् पित्र्येष्वनुदीरिते· प्राचीनावीतितां केचिदित्सत्रापिविन
स्तृणेरिति कल्पः। अपहताइतिरेखां कत्वोदीरितामिस्ववोक्ष्याप आददानाइत्युल्मुकमादाय
अग्निः पावक इति तेनोद्धतदेशमभिपतति· उल्मुकमग्निसमीपे निधाय तस्मिन्नाज्यवि
हन्त्रक्षिप्योद्धतदेशे सकृदाछिन्नमिति दक्षिणाग्रं बर्हिस्तृणाति· बर्हिर्हस्तमुत्थायप्रांजलिः
कोदक्षिणामुखः पितृनावाहयाति· उदीराणाइति· बर्हिर्निधायसकृदाछिन्नस्यपुरस्तां
रकोपबर्हणेदक्षिणोत्तरेनिदधाति· आसनमिति· एकोदकुंभार्धेनतृणं बर्हिषिमार्जयित
पानान्याहरति· मधुपानं क्षीरपानं सक्तुपानं इत्येकैकं द्विधा विभज्य पहूसुत्रयं विप्रेभ्ये

दृत्वाशिष्टानामेकैकंत्रेधाविभज्यतेनद्वः पितरः पानंइतित्रीणिसमर्पयेत्· एवंपितामहप्रपि
तामहाभ्यां· अद्भिःपयसावामिश्रितसक्तूनामेवचार्धंब्राह्मणेभ्यः अर्धंपितृभ्योदद्यात्· एतद्वः
पितरःपितामहाः प्रपितामहाःपानमिति· अन्येपिपक्षास्तत्तंत्रेज्ञेयाः। पूर्वमार्जितशेषेण
तूष्णीमार्जयति· उपरिष्टादेववामार्जनंपानस्येतितंत्रकृत्· अनादृतंतुभवस्वामिनैतत्· अथ
सादिताक्षाणांपरितः। पितापुत्राःप्रादक्षिण्येनोपविशन्ति· अनुज्ञावहवश्चेदुत्तरदेशाइतितं
त्रंकृत्· पुत्राइतिबहुत्वंत्रित्वपर्यवसायीतिहरदत्तः। द्वादशपिताकर्षति· एवंज्येष्ठानुज्ञो·
समसंख्याकर्षणाज्जयिनः कनीयानवशिष्टानपकर्षतिसपराजितो विषमसंख्यापक
र्षणात्· यदिद्वौपुत्रौ~~यदिअपुत्रेद्वेरदंपत्सौ~~तदापिताद्विगुणापकर्षंकुर्यात्· यद्येकः जा
यातृतीया। यदिनस्युः पुत्राःदंपती द्विगुणसंख्यापकर्षंकुर्यातां· एतेनसपत्नीकाग्निहो
त्रेपिपुत्रयोर्द्वयोर्द्विगुणापकर्षइतिहरदत्तः। कृतंकृतमितिवदेत्· कर्षणंकुर्युः पराजि
तो

स्यायंजयोवाः घृतावसानेसर्वेषांजयोवेतिपक्षत्रयमवादि· तंत्रेकृताद्यूनओदनइत्स्क· स्फोत्थाय
२४ रातिनादोदनपर्याप्तिरस्यंग्राह्यमितिकेशवः क्षत्रियकर्तृके एवाधानेक्षघृतमितिविघारणया ः
तोयजमानः शूर्पेसकृदेवव्रीहीन्निर्वपति· पितृभ्यस्त्वा पि· हेभ्योजुष्टमुपाकरोमि· तूष्णींवा
क्षति· पितृभ्यस्त्वा· जुष्टंप्रोक्षामीति· तूष्णींवा· कृष्णाजिनेउलूखलंनिधायमुसलेनाव
सफलीकृतान्प्रक्षाल्यतंडुलोदकंपात्रांतरेनिधायचरुमामाज्यंचाधिश्रित्यसोमयंपर्य
ग्निकृत्वोद्वास्यवपाहोमार्थंचरोरेकंपिंडंउद्धृत्यपंचस्रुवाहुतीर्जुहोति· याःप्राचीः नमःस
हा· पित्रइदं· अंतर्द्दधे· पितामहायेदं· अंतर्दधऋतुभिः सर्वैः प्रपितामहायेदं· यन्मेम
ता· पित्रइदं· यद्वः क्रव्याः पितृभ्यइदं· वपार्थंपिंडंत्रेधाविभज्योपस्तारणादिवर्जंमौदुंबर
स्रुचाजुहोतीतितंत्रकृत्· उपस्तरणादिमुक्तमितिकेशवः। सोमायपितृमते· अंगिर
नमूनपे· यमायांगिरस्वतेपितृमतेइदं· यदग्नेकव्यवाहन· अग्नयेकव्यवाहनायेदं· द

मग्नौ निधायपिंडान्कृत्वाद्वितीयोदकुंभार्द्रेन नृछींमार्जयित्वा उपस्तीर्याभिघारितान्पिंडा
न्दद्यात्· पिंडानामावृद्धहरणेनोपस्तरणाभिघारणाभ्यनोमार्जनोपसंग्रह इति भवोक्तेः एत
त्तेनतद्देवदत्तशर्म· मास्मेछ्वाइति प्रथमं· एतत्ते पितामह· एतत्ते प्रपितामह· इति परौ· मंत्रेत्था
गेचशर्मणोंतेगोत्रोच्चारणंवैकल्पिकमिति हरदत्तः अत्र पितरोयथाभागंमंदध्वमित्युक्त्वा
द्वितीयोदकुंभशेषेणमार्जयित्वाप्रक्षालनपूरितंतृतीयंभूमौप्रवाहयेत्· यानिरक्षांसि·
येनपतिताः। यआमाः येकुमाराः आंजनाभ्यंजनवासांसिमंत्रैर्दत्वा षड्भिर्नमस्कारैर्वि
पर्यासमुपतिष्ठते· तृतीयपिंडानुसंधानपूर्वकंप्रपितामहादिक्रमेणेत्यर्थ इति व्याचख्यौह
रदत्तः नमोवः पितरोरसाय· शुष्माय· जीवाय। स्वधायै· मन्यवे· घोराय· वीरंमेपितरोदत्त·
वीरंमेपितामहा· वीरंमे प्रपितामह दत्त· पितृनुत्थापयति· उत्तिष्ठत पितरः मनसाजान
नुगच्छति· यंतु पितरोयथालोकं· अनुगत्तंमन आह्वयते· मनोन्वाहुवामहइतितिसृ

भिः। अथयजमानः परिहितमहतंवासोगोपितृयज्ञविदेदत्वा विसर्गयोग्यमन्यन्तू परिधायदक्षि
२५ णतोगत्वाचतुर्थ्येदिकुंभेनमार्जयति· यासुगंधाः याऊर्जं· यासांनिक्रमणेयासामिमे· प्राचीरेव
तीर्मधु· यादक्षिणा· याप्रतीचीः याउदीचीयाऊर्ध्वारिस्तेनाभिमार्जयित्वापरिहितंसान्यंवा
